

# Sri Yamuna Stavam – Sri Garga Samhita

# ॥ श्रीयमुना स्तवं - श्रीगर्ग संहिता ॥

The following is a rare stotram on **Sri Yamuna** (river) from **Sri Garga Samhita**, **Madhurya Khanda**, **Chapter 7**. The hymn was given by **Saubhari** to **King Mandhata** at latter's request.

**Saubhari** mentions that this hymn is capable of bestowing all **Siddhis** and four-fold benefits (Dharma, Artha, Kama, Moksha). One who listens to or chants this hymn early in the morning enjoys auspiciousness throughout and one who meditates on this hymn attains **Parama Pada**.

मान्धातोवाच -

यमुनायाः स्तवं दिव्यं सर्व सिद्धि करं परम् ।
सौभरे मुनिशार्दूल वद मां कृपया त्वरम् ॥ १ ॥

श्रीसौभरिरुवाच -

मातङ्ग कन्यास् तु स्तवं शृणु महामते ।
सर्व सिद्धि करं भूमौ चातुर् वर्ग्य फल प्रदम् ॥ २ ॥

कृष्ण वामांस भूतायै कृष्णायै सततं नमः ।
नमः कृष्ण रूपिण्यै कृष्णे तुभ्यं नमो नमः ॥ ३ ॥

यः पाप पङ्काम्बु कलङ्क कुत्सितः कामी कुधीः सत्सु कलिं करोति हि ।
वृन्दावनं धाम ददाति तस्मै नदन्मिलिन्दादि कलिन्द नन्दिनी ॥ ४ ॥

कृष्णे साक्षात् कृष्णरूपा त्वमेव वेगावर्ते वर्तसे मत्स्यरूपी ।
ऊर्मावूर्मौ कूर्मरूपी सदा ते बिन्दौ बिन्दौ भाति गोविन्द देवः ॥ ५ ॥

वन्दे लीलावतीं त्वां सघन घन निभां कृष्ण वामांस भूताम् ।
वेगं वै वैरजाख्यं सकल जलचयं खण्डयन्तीं बलात्स्वात् ।

छित्वा ब्रह्माण्डमारात् सुर नगर नगान् गण्ड शैलादि दुर्गान् ।
भित्त्वा भूखण्ड मध्ये तट निधृतवतीं ऊर्मिमालां प्रयान्तीम् ॥ ६ ॥

दिव्यं कौ नामधेयं श्रुतमथ यमुने दण्डयत्यद्रि तुल्यम् ।
पाप व्यूहं त्वखण्डं वसतु मम गिरां मण्डले तु क्षणं तत् ।

दण्ड्यांश्चाकार्यदण्ड्यान् सकृदपि वचसा खण्डितं यद् गृहीतम् ।
भ्रातुर् मार्ताण्ड सूनोरटति पुरि दृढस्ते प्रचण्डो ऽ तिदण्डः ॥ ७ ॥

रज्जुर्वा विषया ऽ न्धकूप तरणे पापाखुदर्वीकरी ।
वेण्युष्णिक् च विराज मूर्ति शिरसो मालाऽस्ति वा सुन्दरी ।

धन्यं भाग्य मतः परं भुवि नृणां यत्रादिकृद् वल्लभा ।
गोलोके ऽ प्यति दुर्लभा ऽ तिशुभगा भात्यद्वितीया नदी ॥ ८ ॥

गोपी गोकुल गोप केलि कलिते कालिन्दी कृष्ण प्रभे ।
त्वत् कूले जल लोल गोल विचलत् कल्लोल कोलाहलः ।

त्वत् कान्तार कुतूहलालि कुल कृज् झङ्कार केकाकुलः ।
कूजत् कोकिल सङ्कुलो व्रज लता ऽ लङ्कार भृत् पातु माम् ॥ ९ ॥

भवन्ति जिह्वास्तनुरोम तुल्या गिरो यदा भूसिकता इवाशु ।
तदप्यलं यान्ति न ते गुणान्तं सन्तो महान्तः किल शेष तुल्याः ॥ १० ॥

## ॥ फलश्रुतिः ॥

कलिन्द गिरि नन्दिनी स्तव उषस्यं वापरः श्रुतश्च च
यदि पाठितो भुवि तनोति सन्मङ्गलम् ।
जनोऽपि यदि धारयेत् किल पठेच् च नित्यशः
स याति परमं पदं निज निकुञ्ज लीलावृतम् ॥ ११ ॥

---

॥ इति श्रीगार्ग संहितायां माधुर्य खण्डे श्रीयमुना स्तवं सम्पूर्णम् ॥